1. नासत्यौ इति कस्य नाम ?

(A) द्यावापृथिव्यो:

(B) इन्द्रावरुणयो:

(C) अश्विनो:

(D) इन्द्राग्न्यो:

2. चन्द्ररथा का वर्तते ?

(A) नदी

(B) उर्वशी

(C) उषा:

(D) यमी

3. ऋग्वेदे कति मण्डलानि सन्ति ?

(A) नव

(B) विंशति:

(C) दश

(D) द्वादश

4. कपर्दी देव: क: ?

(A) अग्नि:

(B) वरुण:

(C) रुद्र:

(D) बृहस्पति:

5. जैमिनीयशाखा कस्य वेदस्य ?

(A) ऋग्वेदस्य

(B) यजुर्वेदस्य

(C) सामवेदस्य

(D) अथर्ववेदस्य

6. नक्षत्रसम्पातगणनया केन वेदकालो निर्धार्यते ?

(A) मैक्समूलर:

(B) वेबर:

(C) बालगंगाधरतिलक:

(D) जैकोबी

7. निरुक्तग्रन्थे काण्डसंख्या वर्तते –

(A) चतुर्दश

(B) द्वादश

(C) पंच

(D) त्रीणि

8. "आ घा ता गच्छा" इति पठ्यते –

(A) इन्द्रसूक्ते

(B) वरुणसूक्ते

(C) विश्वमित्रनदी सम्वादे

(D) यमयमीसम्वादे

9. "तमसो मा ज्योतिर्गमय" इति कुत्र विद्यते ?

(A) ऋग्वेदे

(B) बृहदारण्यके

(C) अथर्ववेदे

(D) सामविधाने

10. अधोऽङ्कितानां समीचीनमुत्तरं चिनुत –

| | |
|---|---|
| (a) सरमा-पणि सम्वाद: | 1. बृहदारण्यकोपनिषत् |
| (b) स्वाध्यायान्मा प्रमद: | 2. ऋग्वेदस्य दशममण्डले |
| (c) कल्प: | 3. तैत्तिरीयोपनिषत् |
| (d) आत्मनस्तु कामाय सर्वं प्रियं भवति | 4. हस्त: |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 1 | 3 | 2 | 4 |
| (B) | 4 | 2 | 3 | 1 |
| (C) | 2 | 3 | 4 | 1 |
| (D) | 3 | 2 | 1 | 4 |

11. श्रुतौ यज्ञस्वरूपेण स्तूयते –

(A) गंगा

(B) गोदावरी

(C) विष्णु:

(D) वरुण:

12. अथर्ववेदस्य ब्राह्मणम् विद्यते –

(A) शतपथब्राह्मणम्

(B) गोपथब्राह्मणम्

(C) ताड्यब्राह्मणम्

(D) ऐतरेयब्राह्मणम्

13. कृष्णयजुर्वेदेन सम्बद्धास्ति –

(A) छान्दोग्योपनिषत्

(B) कठोपनिषत्

(C) ऐतरेयोपनिषत्

(D) ईशावास्योपनिषत्

14. तर्कभाषानुसारं कारणं त्रिविधम् –

(A) समवायि - असमवायि - निमित्तभेदात्

(B) समवायि - संयुक्तसमवायि - निमित्तभेदात्

(C) संयोग - संयुक्ततादात्म्य - निमित्तभेदात्

(D) सहकारि - तादात्म्य - समवायिभेदात् ।

15. .........वाक्यम् भवति –

(A) ध्वनिसमूह:

(B) साकांक्षपद समूह:

(C) शब्दसमूह:

(D) वर्णसमूह:

**16.** कीदृशः तर्कभाषासम्मतः अपवर्गः ?

(A) दुःखस्यात्यन्तिकी निवृत्तिः

(B) दुःखस्यैकान्तिकी निवृत्तिः

(C) ब्रह्मसायुज्यम्

(D) स्वर्गात्मकः ।

**17.** उपमितिज्ञानं कथं जायते ?

(A) व्याप्तिज्ञानात्

(B) इन्द्रियसन्निकर्षात्

(C) सादृश्यात्

(D) पदज्ञानात्

**18.** तर्कभाषानुसारं किमस्ति नवमं द्रव्यम् ?

(A) जीवः

(B) जगत्

(C) दिक्

(D) आत्मा

**19.** तर्कभाषायां कति प्रमाणानि ?

(A) द्वौ

(B) त्रीणि

(C) चत्वारि

(D) सप्त

**20.** सांख्यकारिकायां कीदृशा गुणाः ?

(A) इष्टानिष्टोभयात्मकाः

(B) प्रकाशप्रवृत्तिनियमार्थाः

(C) सुख-दुःख - रागात्मकाः

(D) विषादात्मकाः

**21.** सांख्यकारिकायां कीदृशं कैवल्यम् ?

(A) आत्यन्तिकदुःखनिवृत्तिः

(B) ऐकान्तिकदुःखनिवृत्तिः

(C) सुखाभिव्यक्तिः

(D) ऐकान्तिकात्यन्तिकदुःखनिवृत्तिः

**22.** सांख्यकारिकायां ज्ञानं कस्य धर्मः ?

(A) अहङ्कारस्य

(B) प्रकृतेः

(C) पुरुषस्य

(D) बुद्धेः

**23.** वेदान्तसारे अज्ञानस्य कतिविधा शक्तिः ?

(A) द्विविधा

(B) त्रिविधा

(C) चतुर्धा

(D) पञ्चधा

**24.** वेदान्तसारे अनिर्वचनीयं किम् ?

(A) ईश्वरः

(B) जीवः

(C) जगत्

(D) ब्रह्म

**25.** वेदान्तसारे लिङ्गशरीरस्य कति अवयवाः ?

(A) त्रयोदश

(B) पञ्चदश

(C) सप्तदश

(D) एकोनविंशतिः

**26.** कर्मणा यमभिप्रैति….. इत्यत्र किम् कारकम् ?

(A) कर्म

(B) करणम्

(C) सम्प्रदानम्

(D) अधिकरणम्

**27.** 'निर्मक्षिकम्' – अस्य पदस्य लौकिकविग्रह: भवति –

(A) निर् + मक्षिका + अम्

(B) मक्षिका + टा + निर्

(C) मक्षिक + सुँ + निर्

(D) मक्षिका + आम् + निर्

**28.** पाणिनिमते मुनिशब्दस्य का संज्ञा भवति ?

(A) नदी

(B) घि

(C) टि

(D) अपृक्त

**29.** समासशास्त्रे प्रथमानिर्दिष्टं किं भवति ?

(A) उपसर्ग:

(B) अव्ययम्

(C) उपसर्जनम्

(D) प्रातिपदिकम्

**30.** गुण संज्ञा विधायकं सूत्रं किम् ?

(A) वृद्धिरेचि

(B) अक: सवर्णे दीर्घ:

(C) आद्‌गुण:

(D) अदेङ गुण:

**31.** 'ग्रामं गच्छंस्तृणं स्पृशति' – इत्यत्र द्वितीयाविधायकं सूत्रं किम् ?

(A) अकथितञ्च

(B) स्पृहेरीप्सित:

(C) कर्त्तुरीप्सिततमं कर्म

(D) तथायुक्तं चानीप्सितम्

**32.** 'द्वियमुनम्' इत्यत्र क: समास: ?

(A) द्विगु:

(B) द्वन्द्व:

(C) अव्ययी भाव:

(D) तत्पुरुष:

**33.** अधस्तनयुग्मानां समीचीनां तालिकां विचिनुत –

| | | | |
|---|---|---|---|
| (a) | हलोऽनन्तरा: | 1. | केवलसमास: |
| (b) | विशेषसंज्ञा-विनिर्मुक्त: | 2. | संयोग: |
| (c) | प्रायेणान्यपदार्थ-प्रधान: | 3. | इत्थंभूतलक्षणे |
| (d) | जटाभिस्तापस: | 4. | बहुव्रीहि: |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 3 | 4 | 2 | 1 |
| (B) | 1 | 2 | 3 | 4 |
| (C) | 2 | 1 | 4 | 3 |
| (D) | 4 | 3 | 1 | 2 |

**34.** 'भूतबलि:' इत्यत्र समास: केन सूत्रेण विधीयते ?

(A) कर्तृकरणे कृता बहुलम्

(B) चतुर्थी तदर्थार्थबलिहितसुखरक्षितै:

(C) पञ्चमी भयेन

(D) सप्तमी शौण्डै:

**35.** क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थ: क: स्यात् ?

(A) कर्म

(B) करणम्

(C) कर्ता

(D) अधिकरणम्

**36.** भाषाविज्ञाने बलाघातस्य भेदा: सन्ति –

(A) चत्वार:

(B) सप्त

(C) दश

(D) द्वादश

**37.** अर्थबोधस्य कति प्रमुखसाधनानि ?

(A) सप्त

(B) नव

(C) एकादश

(D) त्रयोदश

**38.** अतादृशिगुणीभूतव्यङ्ग्ये किं काव्यम् ?

(A) उत्तमोत्तमम्

(B) उत्तमम्

(C) मध्यमम्

(D) अधमम्

**39.** अधोनिर्दिष्टेषु साध्यवसानालक्षणाया: उदाहरणं किं भवति ?

(A) गङ्गायां घोष:

(B) कुन्ता: प्रविशन्ति

(C) गौरेवायम्

(D) गौर्वाहीक:

**40.** व्यायोगे नायक: कीदृश: ?

(A) धीरोदात्त:

(B) धीरशान्त:

(C) धीरोद्धत:

(D) धीरललित:

**41.** मृच्छकटिकं कस्य रूपकस्य उदाहरणं भवति ?

(A) नाटकस्य

(B) प्रकरणस्य

(C) डिमस्य

(D) वीथ्या:

**42.** रौद्ररसस्य स्थायिभाव: क: ?

(A) उत्साह:

(B) भयम्

(C) जुगुप्सा

(D) क्रोध:

**43.** भट्टनायकस्य भुक्तिवाद: कस्य मतस्यानुकूलम् ?

(A) मीमांसामतस्य

(B) सांख्यमतस्य

(C) न्यायमतस्य

(D) वेदान्तमतस्य

**44.** मल्लिनाथेन काव्यस्यास्याष्टमसर्गपर्यन्तमेव व्याख्यानं रचितम् :—

(A) रघुवंशस्य

(B) किरातार्जुनीयस्य

(C) कुमारसम्भवस्य

(D) नैषधस्य

**45.** लक्ष्मीचाञ्चल्यमस्मिन्नुपवर्णितमस्ति –

(A) शाकुन्तले

(B) कादम्बर्याम्

(C) हर्षचरिते

(D) रघुवंशे

**46.** वीररसप्रधानं नाटकमिदम् –

(A) स्वप्नवासवदत्तम्

(B) वेणीसंहारम्

(C) मालतीमाधवम्

(D) नागानन्दम्

**47.** एनं "कवीनामिह चक्रवर्ती" इति वदन्ति विपश्चित:—

(A) कालिदास:

(B) श्रीहर्ष:

(C) वाल्मीकि:

(D) बाण:

**48.** अधस्तनयुग्मानां समीचीनां तालिकां विचिनुत –

(a) द्वाविंशतिसर्गात्मकम् — 1. शिशुपालवधम्

(b) विंशतिसर्गात्मकम् — 2. रघुवंशमहाकाव्यम्

(c) एकोनविंशतिसर्गात्मकम् — 3. किरातार्जुनीयम्

(d) अष्टादशसर्गात्मकम् — 4. नैषधमहाकाव्यम्

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 3 | 1 | 4 | 2 |
| (B) | 2 | 3 | 1 | 4 |
| (C) | 1 | 4 | 3 | 2 |
| (D) | 4 | 1 | 2 | 3 |

**49.** भवभूतिमहाकवेरिमां "निरर्गलतरङ्गिणी"ति वदन्ति –

(A) स्रग्धरा

(B) मन्दाक्रान्ता

(C) शिखरिणी

(D) वसन्ततिलका

**50.** "सरस्वती श्रुति महती महीयता"मिति केनोक्तम् ।

(A) वाल्मीकिना

(B) भवभूतिना

(C) कालिदासेन

(D) श्रीहर्षेण